# Shri Devi SahasranAmastotram

# શ્રીદેવીસહસ્રનામસ્તોત્રમ્ કૂર્મપુરાણાન્તર્ગતમ્

## Document Information

Text title : shrIdevIsahasranAmastotra kUrmapurANAntargatam

File name : shrIdevIsahasranAmastotra.itx

Category : sahasranAma, devii, pArvatI, stotra, devI

Location : doc_devii

Transliterated by : sa.wikisource.org

Proofread by : DPD

Description-comments : shrIshaktisahasranAmastotra sa.ngraha whos has

Latest update : April 9, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીદેવીસહસ્રનામસ્તોત્રમ્ કૂર્મપુરાણાન્તર્ગતમ્

ઋષયઃ ઊચુઃ –
કૈષા ભગવતી દેવી શંકરાર્ધશરીરિણી ।
શિવા સતી હૈમવતી યથાવદ્બ્રૂહિ પૃચ્છતામ્ ॥ ૧॥

તેષાં તદ્વચનં શ્રુત્વા મુનીનાં પુરુષોત્તમઃ ।
પ્રત્યુવાચ મહાયોગી ધ્યાત્વા સ્વં પરમં પદમ્ ॥ ૨॥

શ્રીકૂર્મ ઉવાચ –
પુરા પિતામહેનોક્તં મેરુપૃષ્ઠે સુશોભનમ્ ।
રહસ્યમેતદ્ વિજ્ઞાનં ગોપનીયં વિશેષતઃ ॥ ૩॥

સાંખ્યાનાં પરમં સાંખ્યં બ્રહ્મવિજ્ઞાનમુત્તમમ્ ।
સંસારાર્ણવમગ્નાનાં જન્તૂનામેકમોચનમ્ ॥ ૪॥

યા સા માહેશ્વરી શક્તિર્જ્ઞાનરૂપાઽતિલાલસા ।
વ્યોમસંજ્ઞા પરા કાષ્ઠા સેયં હૈમવતી મતા ॥ ૫॥

શિવા સર્વગતાઽનન્તા ગુણાતીતા સુનિષ્કલા ।
એકાનેકવિભાગસ્થા જ્ઞાનરૂપાઽતિલાલસા ॥ ૬॥

અનન્યા નિષ્કલે તત્ત્વે સંસ્થિતા તસ્ય તેજસા ।
સ્વાભાવિકી ચ તન્મૂલા પ્રભા ભાનોરિવામલા ॥ ૭॥

એકા માહેશ્વરી શક્તિરનેકોપાધિયોગતઃ ।
પરાવરેણ રૂપેણ ક્રીડતે તસ્ય સન્નિધૌ ॥ ૮॥

સેયં કરોતિ સકલં તસ્યાઃ કાર્યમિદં જગત્ ।
ન કાર્યં નાપિ કરણમીશ્વરસ્યેતિ સૂરયઃ ॥ ૯॥

ચતસ્રઃ શક્તયો દેવ્યાઃ સ્વરૂપત્વેન સંસ્થિતાઃ ।
અધિષ્ઠાનવશાત્તસ્યાઃ શ઼ૃણુધ્વં મુનિપુઙ્ગવાઃ ॥ ૧૦॥

શાન્તિર્વિદ્યા પ્રતિષ્ઠા ચ નિવૃત્તિશ્ચેતિ તાઃ સ્મૃતાઃ ।
ચતુર્વ્યૂહસ્તતો દેવઃ પ્રોચ્યતે પરમેશ્વરઃ ॥ ૧૧॥

અનયા પરયા દેવઃ સ્વાત્માનન્દં સમશ્નુતે ।
ચતુર્ષ્વપિ ચ વેદેષુ ચતુર્મૂર્તિર્મહેશ્વરઃ ॥ ૧૨॥

અસ્યાસ્ત્વનાદિસંસિદ્ધમૈશ્વર્યમતુલં મહત્ ।
તત્સમ્બન્ધાદનન્તાયાઃ રુદ્રેણ પરમાત્મના ॥ ૧૩॥

સૈષા સર્વેશ્વરી દેવી સર્વભૂતપ્રવર્તિકા ।
પ્રોચ્યતે ભગવાન્ કાલો હરિઃ પ્રાણો મહેશ્વરઃ ॥ ૧૪॥

તત્ર સર્વમિદં પ્રોતમોત ચૈવાખિલં જગત્ ।
સ કાલોઽગ્નિર્હરો રુદ્રો ગીયતે વેદવાદિભિઃ ॥ ૧૫॥

કાલઃ સૃજતિ ભૂતાનિ કાલઃ સંહરતે પ્રજાઃ ।
સર્વે કાલસ્ય વશગા ન કાલઃ કસ્યચિદ્ વશે ॥ ૧૬॥

પ્રધાનં પુરુષસ્તત્ત્વં મહાનાત્મા ત્વહંકૃતિઃ ।
કાલેનાન્યાનિ તત્ત્વાનિ સમાવિષ્ટાનિ યોગિના ॥ ૧૭॥

તસ્ય સર્વજગત્સૂતિઃ શક્તિર્માયેતિ વિશ્રુતા ।
તયેદં ભ્રામયેદીશો માયાવી પુરુષોત્તમઃ ॥ ૧૮॥

સૈષા માયાત્મિકા શક્તિઃ સર્વાકારા સનાતની ।
વૈશ્વરૂપં મહેશસ્ય સર્વદા સમ્પ્રકાશયેત્ ॥ ૧૯॥

અન્યાશ્ચ શક્તયો મુખ્યાસ્તસ્ય દેવસ્ય નિર્મિતાઃ ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિઃ પ્રાણશક્તિરિતિ ત્રયમ્ ॥ ૨૦॥

સર્વાસામેવ શક્તીનાં શક્તિમન્તો વિનિર્મિતાઃ ।
માયયૈવાથ વિપ્રેન્દ્રાઃ સા ચાનાદિરનન્તયાઃ ॥ ૨૧॥

સર્વશક્ત્યાત્મિકા માયા દુર્નિવારા દુરત્યયા ।
માયાવી સર્વશક્તીશઃ કાલઃ કાલકારઃ પ્રભુઃ ॥ ૨૨॥

કરોતિ કાલઃ સકલં સંહરેત્ કાલ એવ હિ ।
કાલઃ સ્થાપયતે વિશ્વં કાલાધીનમિદં જગત્ ॥ ૨૩॥

લબ્ધ્વા દેવાધિદેવસ્ય સન્નિધિં પરમેષ્ઠિનઃ ।
અનન્તસ્યાખિલેશસ્ય શંભોઃ કાલાત્મનઃ પ્રભોઃ ॥ ૨૪॥

પ્રધાનં પુરુષો માયા માયા ચૈવં પ્રપદ્યતે ।
એકા સર્વગતાનન્તા કેવલા નિષ્કલા શિવા ॥ ૨૫॥

એકા શક્તિઃ શિવૈકોઽપિ શક્તિમાનુચ્યતે શિવઃ ।
શક્તયઃ શક્તિમન્તોઽન્યે સર્વશક્તિસમુદ્ભવાઃ ॥ ૨૬॥

શક્તિશક્તિમતોર્ભેદં વદન્તિ પરમાર્થતઃ ।
અભેદં ચાનુપશ્યન્તિ યોગિનસ્તત્ત્વચિન્તકાઃ ॥ ૨૭॥

શક્તયો ગિરિજા દેવી શક્તિમન્તોઽથ શંકરઃ ।
વિશેષઃ કથ્યતે ચાયં પુરાણે બ્રહ્મવાદિભિઃ ॥ ૨૮॥

ભોગ્યા વિશ્વેશ્વરી દેવી મહેશ્વરપતિવ્રતા ।
પ્રોચ્યતે ભગવાન્ ભોક્તા કપર્દી નીલલોહિતઃ ॥ ૨૯॥

મન્તા વિશ્વેશ્વરો દેવઃ શંકરો મન્મથાન્તકઃ ।
પ્રોચ્યતે મતિરીશાની મન્તવ્યા ચ વિચારતઃ ॥ ૩૦॥

ઇત્યેતદખિલં વિપ્રાઃ શક્તિશક્તિમદુદ્ભવમ્ ।
પ્રોચ્યતે સર્વવેદેષુ મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૩૧॥

એતત્પ્રદર્શિતં દિવ્યં દેવ્યા માહાત્મ્યમુત્તમમ્ ।
સર્વવેદાન્તવેદેષુ નિશ્ચિતં બ્રહ્મવાદિભિઃ ॥ ૩૨॥

એકં સર્વગતં સૂક્ષ્મં કૂટસ્થમચલં ધ્રુવમ્ ।
યોગિનસ્તત્પ્રપશ્યન્તિ મહાદેવ્યાઃ પરં પદમ્ ॥ ૩૩॥

આનન્દમક્ષરં બ્રહ્મ કેવલં નિષ્કલં પરમ્ ।
યોગિનસ્તત્પ્રપશ્યન્તિ મહાદેવ્યાઃ પરં પદમ્ ॥ ૩૪॥

પરાત્પરતરં તત્ત્વં શાશ્વતં શિવમચ્યુતમ્ ।
અનન્તપ્રકૃતૌ લીનં દેવ્યાસ્તત્પરમં પદમ્ ॥ ૩૫॥

શુભં નિરઞ્જનં શુદ્ધં નિર્ગુણં દ્વૈતવર્જિતમ્ ।
આત્મોપલબ્ધિવિષયં દેવ્યાસ્તતપરમં પદમ્ ॥ ૩૬॥

સૈષા ધાત્રી વિધાત્રી ચ પરમાનન્દમિચ્છતામ્ ।
સંસારતાપાનખિલાન્નિહન્તીશ્વરસંશ્રયા ॥ ૩૭॥

તસ્માદ્વિમુક્તિમન્વિચ્છન્ પાર્વતીં પરમેશ્વરીમ્ ।

આશ્રયેત્સર્વભૂતાનામાત્મભૂતાં શિવાત્મિકામ્ ॥ ૩૮॥

લબ્ધ્વા ચ પુત્રીં શર્વાણીં તપસ્તપ્ત્વા સુદુશ્ચરન્ ।
સભાર્યઃ શરણં યાતઃ પાર્વતીં પરમેશ્વરીમ્ ॥ ૩૯॥

તાં દૃષ્ટ્વા જાયમાનાં ચ સ્વેચ્છયૈવ વરાનનામ્ ।
મેના હિમવતઃ પત્ની પ્રાહેદં પર્વતેશ્વરમ્ ॥ ૪૦॥

મેનોવાચ –
પશ્ય બાલામિમાં રાજન્ રાજીવસદૃશાનનામ્ ।
હિતાય સર્વભૂતાનાં જાતા ચ તપસાઽઽવયોઃ ॥ ૪૧॥

સોઽપિ દૃષ્ટ્વા તતઃ દેવીં તરુણાદિત્યસન્નિભામ્ ।
કપર્દિનીં ચતુર્વક્ત્રાં ત્રિનેત્રામતિલાલસામ્ ॥ ૪૨॥

અષ્ટહસ્તાં વિશાલાક્ષીં ચન્દ્રાવયવભૂષણામ્ ।
નિર્ગુણાં સગુણાં સાક્ષાત્સદસદ્વ્યક્તિવર્જિતામ્ ॥ ૪૩॥

પ્રણમ્ય શિરસા ભૂમૌ તેજસા ચાતિવિહ્વલઃ ।
ભીતઃ કૃતાઞ્જલિસ્તસ્યાઃ પ્રોવાચ પરમેશ્વરીમ્ ॥ ૪૪॥

હિમવાનુવાચ –
કા ત્વં દેવિ વિશાલાક્ષિ શશાઙ્કાવયવાઙ્કિતે ।
ન જાને ત્વામહં વત્સે યથાવદ્બ્રૂહિ પૃચ્છતે ॥ ૪૫॥

ગિરીન્દ્રવચનં શ્રુત્વા તતઃ સા પરમેશ્વરી ।
વ્યાજહાર મહાશૈલં યોગિનામભયપ્રદા ॥ ૪૬॥

દેવ્યુવાચ –
માં વિદ્ધિ પરમાં શક્તિં પરમેશ્વરસમાશ્રયામ્ ।
અનન્યામવ્યયામેકાં યાં પશ્યન્તિ મુમુક્ષવઃ ॥ ૪૭॥

અહં વૈ સર્વભાવાનાત્મા સર્વાન્તરા શિવા ।
શાશ્વતૈશ્વર્યવિજ્ઞાનમૂર્તિઃ સર્વપ્રવર્તિકા ॥ ૪૮॥

અનન્તાઽનન્તમહિમા સંસારાર્ણવતારિણી ।
દિવ્યં દદામિ તે ચક્ષુઃ પશ્ય મે રૂપમૈશ્વરમ્ ॥ ૪૯॥

એતાવદુક્ત્વા વિજ્ઞાનં દત્ત્વા હિમવતે સ્વયમ્ ।
સ્વં રૂપં દર્શયામાસ દિવ્યં તત્ પારમેશ્વરમ્ ॥ ૫૦॥

કોટિસૂર્યપ્રતીકાશં તેજોબિમ્બં નિરાકુલમ્ ।
જ્વાલામાલાસહસ્રાઢ્યં કાલાનલશતોપમમ્ ॥ ૫૧॥

દંષ્ટ્રાકરાલં દુર્ધર્ષં જટામણ્ડલમણ્ડિતમ્ ।
ત્રિશૂલવરહસ્તં ચ ઘોરરૂપં ભયાનકમ્ ॥ ૫૨॥

પ્રશાન્તં સોમ્યવદનમનન્તાશ્ચર્યસંયુતમ્ ।
ચન્દ્રાવયવલક્ષ્માણં ચન્દ્રકોટિસમપ્રભમ્ ॥ ૫૩॥

કિરીટિનં ગદાહસ્તં નૂપુરૈરુપશોભિતમ્ ।
દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ॥ ૫૪॥

શઙ્ખચક્રધરં કામ્યં ત્રિનેત્રં કૃત્તિવાસસમ્ ।
અણ્ડસ્થં ચાણ્ડબાહ્યસ્થં બાહ્યમાભ્યન્તરં પરમ્ ॥ ૫૫॥

સર્વશક્તિમયં શુભ્રં સર્વાકારં સનાતનમ્ ।
બ્રહ્મોન્દ્રોપેન્દ્રયોગીન્દ્રૈર્વન્દ્યમાનપદામ્બુજમ્ ॥ ૫૬॥

સર્વતઃ પાણિપાદાન્તં સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વમાવૃત્ય તિષ્ઠન્તં દદર્શ પરમેશ્વરમ્ ॥ ૫૭॥

દૃષ્ટ્વા તદીદૃશં રૂપં દેવ્યા માહેશ્વરં પરમ્ ।
ભયેન ચ સમાવિષ્ટઃ સ રાજા હૃષ્ટમાનસઃ ॥ ૫૮॥

આત્મન્યાધાય ચાત્માનમોઙ્કારં સમનુસ્મરન્ ।
નામ્નામષ્ટસહસ્રેણ તુષ્ટાવ પરમેશ્વરીમ્ ॥ ૫૯॥

હિમવાનુવાચ –
શિવોમા પરમા શક્તિરનન્તા નિષ્કલામલા ।
શાન્તા માહેશ્વરી નિત્યા શાશ્વતી પરમાક્ષરા ॥ ૬૦॥

અચિન્ત્યા કેવલાઽનન્ત્યા શિવાત્મા પરમાત્મિકા ।
અનાદિરવ્યયા શુદ્ધા દેવાત્મા સર્વગાઽચલા ॥ ૬૧॥

એકાનેકવિભાગસ્થા માયાતીતા સુનિર્મલા ।
મહામાહેશ્વરી સત્યા મહાદેવી નિરઞ્જના ॥ ૬૨॥

કાષ્ઠા સર્વાન્તરસ્થા ચ ચિચ્છક્તિરતિલાલસા ।
નન્દા સર્વાત્મિકા વિદ્યા જ્યોતીરૂપાઽમૃતાક્ષરા ॥ ૬૩॥

શાન્તિઃ પ્રતિષ્ઠા સર્વેષાં નિવૃત્તિરમૃતપ્રદા ।

વ્યોમમૂર્તિર્વ્યોમલયા વ્યોમાધારાઽચ્યુતાઽમરા ॥ ૬૪॥

અનાદિનિધનાઽમોઘા કારણાત્મા કુલાકુલા ।
ક્રતુઃ પ્રથમજા નાભિરમૃતસ્યાત્મસંશ્રયા ॥ ૬૫॥

પ્રાણેશ્વરપ્રિયા માતા મહામહિષઘાતિની ।
પ્રાણેશ્વરી પ્રાણરૂપા પ્રધાનપુરુષેશ્વરી ॥ ૬૬॥

મહામાયા સુદુષ્પૂરા મૂલપ્રકૃતિરીશ્વરી ।
સર્વશક્તિકલાકારા જ્યોત્સ્ના ધૌર્મહિમાસ્પદા ॥ ૬૭॥

સર્વકાર્યનિયન્ત્રી ચ સર્વભૂતેશ્વરેશ્વરી ।
સંસારયોનિઃ સકલા સર્વશક્તિસમુદ્ભવા ॥ ૬૮॥

સંસારપારા દુર્વારા દુર્નિરીક્ષ્ય દુરાસદા ।
પ્રાણશક્તિઃ પ્રાણવિદ્યા યોગિની પરમા કલા ॥ ૬૯॥

મહાવિભૂતિદુર્ધર્ષા મૂલપ્રકૃતિસમ્ભવા ।
અનાદ્યનન્તવિભવા પરાર્થા પુરુષારણિઃ ॥ ૭૦॥

સર્ગસ્થિત્યન્તકરણી સુદુર્વાચ્યા દુરત્યયા ।
શબ્દયોનિઃ શબ્દમયી નાદાખ્યા નાદવિગ્રહા ॥ ૭૧॥

અનાદિરવ્યક્તગુણા મહાનન્દા સનાતની ।
આકાશયોનિર્યોગસ્થા મહાયોગેશ્વરેશ્વરી ॥ ૭૨॥

મહામાયા સુદુષ્પારા મૂલપ્રકૃતિરીશ્વરી ।
પ્રધાનપુરુષાતીતા પ્રધાનપુરુષાત્મિકા ॥ ૭૩॥

પુરાણી ચિન્મયી પુંસામાદિઃ પુરુષરૂપિણી ।
ભૂતાન્તરાત્મા કૂટસ્થા મહાપુરુષસંજ્ઞિતા ॥ ૭૪॥

જન્મમૃત્યુજરાતીતા સર્વશક્તિસમન્વિતા ।
વ્યાપિની ચાનવચ્છિન્ના પ્રધાનાનુપ્રવેશિની ॥ ૭૫॥

ક્ષેત્રજ્ઞશક્તિરવ્યક્તલક્ષણા મલવર્જિતા ।
અનાદિમાયાસંભિન્ના ત્રિતત્ત્વા પ્રકૃતિર્ગુહા ॥ ૭૬॥

મહામાયાસમુત્પન્ના તામસી પૌરુષી ધ્રુવા ।
વ્યક્તાવ્યક્તાત્મિકા કૃષ્ણા રક્તા શુક્લા પ્રસૂતિકા ॥ ૭૭॥

અકાર્યા કાર્યજનની નિત્યં પ્રસવધર્મિણી ।
સર્ગપ્રલયનિર્મુક્તા સૃષ્ટિસ્થિત્યન્તધર્મિણી ॥ ૭૮॥

બ્રહ્મગર્ભા ચતુર્વિંશા પદ્મનાભાઽચ્યુતાત્મિકા ।
વૈદ્યુતી શાશ્વતી યોનિર્જગન્માતેશ્વરપ્રિયા ॥ ૭૯॥

સર્વાધારા મહારૂપા સર્વૈશ્વર્યસમન્વિતા ।
વિશ્વરૂપા મહાગર્ભા વિશ્વેશેચ્છાનુવર્તિની ॥ ૮૦॥

મહીયસી બ્રહ્મયોનિઃ મહાલક્ષ્મીસમુદ્ભવા ।
મહાવિમાનમધ્યસ્થા મહાનિદ્રાત્મહેતુકા ॥ ૮૧॥

સર્વસાધારણી સૂક્ષ્મા હ્યવિદ્યા પારમાર્થિકા ।
અનન્તરૂપાઽનન્તસ્થા દેવી પુરુષમોહિની ॥ ૮૨॥

અનેકાકારસંસ્થાના કાલત્રયવિવર્જિતા ।
બ્રહ્મજન્મા હરેર્મૂર્તિર્બ્રહ્મવિષ્ણુશિવાત્મિકા ॥ ૮૩॥

બ્રહ્મેશવિષ્ણુજનની બ્રહ્માખ્યા બ્રહ્મસંશ્રયા ।
વ્યક્તા પ્રથમજા બ્રાહ્મી મહતી જ્ઞાનરૂપિણી ॥ ૮૪॥

વૈરાગ્યૈશ્વર્યધર્માત્મા બ્રહ્મમૂર્તિર્હૃદિસ્થિતા ।
અપાંયોનિઃ સ્વયંભૂતિર્માનસી તત્ત્વસંભવા ॥ ૮૫॥

ઈશ્વરાણી ચ શર્વાણી શંકરાર્દ્ધશરીરિણી ।
ભવાની ચૈવ રુદ્રાણી મહાલક્ષ્મીરથામ્બિકા ॥ ૮૬॥

મહેશ્વરસમુત્પન્ના ભુક્તિમુક્તિફલપ્રદા ।
સર્વેશ્વરી સર્વવન્દ્યા નિત્યં મુદિતમાનસા ॥ ૮૭॥

બ્રહ્મેન્દ્રોપેન્દ્રનમિતા શંકરેચ્છાનુવર્તિની ।
ઈશ્વરાર્દ્ધાસનગતા મહેશ્વરપતિવ્રતા ॥ ૮૮॥

સકૃદ્વિભાતા સર્વાર્તિ સમુદ્રપરિશોષિણી ।
પાર્વતી હિમવત્પુત્રી પરમાનન્દદાયિની ॥ ૮૯॥

ગુણાઢ્યા યોગજા યોગ્યા જ્ઞાનમૂર્તિર્વિકાસિની ।
સાવિત્રીકમલા લક્ષ્મીઃ શ્રીરનન્તોરસિ સ્થિતા ॥ ૯૦॥

સરોજનિલયા મુદ્રા યોગનિદ્રા સુરાર્દિની ।
સરસ્વતી સર્વવિદ્યા જગજ્જ્યેષ્ઠા સુમઙ્ગલા ॥ ૯૧॥

વાગ્દેવી વરદા વાચ્યા કીર્તિઃ સર્વાર્થસાધિકા ।
યોગીશ્વરી બ્રહ્મવિદ્યા મહાવિદ્યા સુશોભના ॥ ૯૨॥

ગુહ્યવિદ્યાત્મવિદ્યા ચ ધર્મવિદ્યાત્મભાવિતા ।
સ્વાહા વિશ્વંભરા સિદ્ધિઃ સ્વધા મેધા ધૃતિઃ શ્રુતિઃ ॥ ૯૩॥

નીતિઃ સુનીતિઃ સુકૃતિર્માધવી નરવાહિની ।
પૂજ્યા વિભાવરી સૌમ્યા ભોગિની ભોગશાયિની ॥ ૯૪॥

શોભા વંશકરી લોલા માલિની પરમેષ્ઠિની ।
ત્રૈલોક્યસુન્દરી રમ્યા સુન્દરી કામચારિણી ॥ ૯૫॥

મહાનુભાવા સત્ત્વસ્થા મહામહિષમર્દિની ।
પદ્મમાલા પાપહરા વિચિત્રા મુકુટાનના ॥ ૯૬॥

કાન્તા ચિત્રામ્બરધરા દિવ્યાભરણભૂષિતા ।
હંસાખ્યા વ્યોમનિલયા જગત્સૃષ્ટિવિવર્દ્ધિની ॥ ૯૮॥

નિર્યન્ત્રા યન્ત્રવાહસ્થા નન્દિની ભદ્રકાલિકા ।
આદિત્યવર્ણા કૌમારી મયૂરવરવાહિની ॥ ૯૯॥

વૃષાસનગતા ગૌરી મહાકાલી સુરાર્ચિતા ।
અદિતિર્નિયતા રૌદ્રી પદ્મગર્ભા વિવાહના ॥ ૧૦૦॥

વિરૂપાક્ષી લેલિહાના મહાપુરનિવાસિની ।
મહાફલાઽનવદ્યાઙ્ગી કામરૂપા વિભાવરી ॥ ૧૦૧॥

વિચિત્રરત્નમુકુટા પ્રણતાર્તિપ્રભઞ્જની ।
કૌશિકી કર્ષણી રાત્રિસ્ત્રિદશાર્તિવિનાશિની ॥ ૧૦૨॥

બહુરૂપા સ્વરૂપા ચ વિરૂપા રૂપવર્જિતા ।
ભક્તાર્તિશમની ભવ્યા ભવભારવિનાશની ॥ ૧૦૩॥

નિર્ગુણા નિત્યવિભવા નિઃસારા નિરપત્રપા ।
યશસ્વિની સામગીતિર્ભવાઙ્ગનિલયાલયા ॥ ૧૦૪॥

દીક્ષા વિદ્યાધરી દીપ્તા મહેન્દ્રવિનિપાતિની ।
સર્વાતિશાયિની વિશ્વા સર્વસિદ્ધિપ્રદાયિની ॥ ૧૦૫॥

સર્વેશ્વરપ્રિયા ભાર્યા સમુદ્રાન્તરવાસિની ।

અકલઙ્કા નિરાધારા નિત્યસિદ્ધા નિરામયા ॥ ૧૦૬॥

કામધેનુર્બૃહદ્ગર્ભા ધીમતી મોહનાશિની ।
નિઃસઙ્કલ્પા નિરાતઙ્કા વિનયા વિનયપ્રદા ॥ ૧૦૭॥

જ્વાલામાલાસહસ્રાઢ્યા દેવદેવી મનોમયી ।
મહાભગવતી ભર્ગા વાસુદેવસમુદ્ભવા ॥ ૧૦૮॥

મહેન્દ્રોપેન્દ્રભગિની ભક્તિગમ્યા પરાવરા ।
જ્ઞાનજ્ઞેયા જરાતીતા વેદાન્તવિષયા ગતિઃ ॥ ૧૦૯॥

દક્ષિણા દહના દાહ્યા સર્વભૂતનમસ્કૃતા ।
યોગમાયા વિભાગજ્ઞા મહામાયા મહીયસી ॥ ૧૧૦॥

સંધ્યા સર્વસમુદ્ભૂતિર્બ્રહ્મવૃક્ષાશ્રયાનતિઃ ।
બીજાઙ્કુરસમુદ્ભૂતિર્મહાશક્તિર્મહામતિઃ ॥ ૧૧૧॥

ખ્યાતિઃ પ્રજ્ઞા ચિતિઃ સંવિત્ મહાભોગીન્દ્રશાયિની ।
વિકૃતિઃ શાઙ્કરી શાસ્ત્રી ગણગન્ધર્વસેવિતા ॥ ૧૧૨॥

વૈશ્વાનરી મહાશાલા દેવસેના ગુહપ્રિયા ।
મહારાત્રિઃ શિવાનન્દા શચી દુઃસ્વપ્નનાશિની ॥ ૧૧૩॥

ઇજ્યા પૂજ્યા જગદ્ધાત્રી દુર્વિજ્ઞેયા સુરૂપિણી ।
ગુહામ્બિકા ગુણોત્પત્તિર્મહાપીઠા મરુત્સુતા ॥ ૧૧૪॥

હવ્યવાહાન્તરાગાદિઃ હવ્યવાહસમુદ્ભવા ।
જગદ્યોનિર્જગન્માતા જન્મમૃત્યુજરાતિગા ।
બુદ્ધિમાતા બુદ્ધિમતી પુરુષાન્તરવાસિની ॥ ૧૧૭॥

તપસ્વિની સમાધિસ્થા ત્રિનેત્રા દિવિસંસ્થિતા ।
સર્વેન્દ્રિયમનોમાતા સર્વભૂતહૃદિસ્થિતા ॥ ૧૧૮॥

સંસારતારિણી વિદ્યા બ્રહ્મવાદિમનોલયા ।
બ્રહ્માણી બૃહતી બ્રાહ્મી બ્રહ્મભૂતા ભવારણી ॥ ૧૧૯॥

હિરણ્મયી મહારાત્રિઃ સંસારપરિવર્ત્તિકા ।
સુમાલિની સુરૂપા ચ ભાવિની તારિણી પ્રભા ॥ ૧૨૦॥

ઉન્મીલની સર્વસહા સર્વપ્રત્યયસાક્ષિણી ।
સુસૌમ્યા ચન્દ્રવદના તાણ્ડવાસક્તમાનસા ॥ ૧૨૧॥

સત્ત્વશુદ્ધિકરી શુદ્ધિર્મલત્રયવિનાશિની ।
જગત્પ્રિયા જગન્મૂર્તિસ્ત્રિમૂર્તિરમૃતાશ્રયા ॥ ૧૨૨॥

નિરાશ્રયા નિરાહારા નિરઙ્કુરવનોદ્ભવા ।
ચન્દ્રહસ્તા વિચિત્રાઙ્ગી સ્રગ્વિણી પદ્મધારિણી ॥ ૧૨૩॥

પરાવરવિધાનજ્ઞા મહાપુરુષપૂર્વજા ।
વિદ્યેશ્વરપ્રિયા વિદ્યા વિદ્યુજ્જિહ્વા જિતશ્રમા ॥ ૧૨૪॥

વિદ્યામયી સહસ્રાક્ષી સહસ્રવદનાત્મજા ।
સહસ્રરશ્મિઃ સત્ત્વસ્થા મહેશ્વરપદાશ્રયા ॥ ૧૨૫॥

ક્ષાલિની સન્મયી વ્યાપ્તા તૈજસી પદ્મબોધિકા ।
મહામાયાશ્રયા માન્યા મહાદેવમનોરમા ॥ ૧૨૬॥

વ્યોમલક્ષ્મીઃ સિંહરથા ચેકિતાનામિતપ્રભા ।
વીરેશ્વરી વિમાનસ્થા વિશોકા શોકનાશિની ॥ ૧૨૭॥

અનાહતા કુણ્ડલિની નલિની પદ્મવાસિની ।
સદાનન્દા સદાકીર્તિઃ સર્વભૂતાશ્રયસ્થિતા ॥ ૧૨૮॥

વાગ્દેવતા બ્રહ્મકલા કલાતીતા કલારણી ।
બ્રહ્મશ્રીર્બ્રહ્મહૃદયા બ્રહ્મવિષ્ણુશિવપ્રિયા ॥ ૧૨૯॥

વ્યોમશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિઃ પરાગતિઃ ।
ક્ષોભિકા બન્ધિકા ભેદ્યા ભેદાભેદવિવર્જિતા ॥ ૧૩૦॥

અભિન્નાભિન્નસંસ્થાના વંશિની વંશહારિણી ।
ગુહ્યશક્તિર્ગુણાતીતા સર્વદા સર્વતોમુખી ॥ ૧૩૧॥

ભગિની ભગવત્પત્ની સકલા કાલકારિણી ।
સર્વવિત્ સર્વતોભદ્રા ગુહ્યાતીતા ગુહારણિઃ ॥ ૧૩૨॥

પ્રક્રિયા યોગમાતા ચ ગઙ્ગા વિશ્વેશ્વરેશ્વરી ।
કપિલા કાપિલા કાન્તાકનકાભાકલાન્તરા ॥ ૧૩૩॥

પુણ્યા પુષ્કરિણી ભોક્ત્રી પુરંદરપુરસ્સરા ।
પોષણી પરમૈશ્વર્યભૂતિદા ભૂતિભૂષણા ॥ ૧૩૪॥

પઞ્ચબ્રહ્મસમુત્પત્તિઃ પરમાર્થાર્થવિગ્રહા ।

ધર્મોદયા ભાનુમતી યોગિજ્ઞેય મનોજવા ॥ ૧૩૫॥

મનોહરા મનોરક્ષા તાપસી વેદરૂપિણી ।
વેદશક્તિર્વેદમાતા વેદવિદ્યાપ્રકાશિની ॥ ૧૩૬॥

યોગેશ્વરેશ્વરી માતા મહાશક્તિર્મનોમયી ।
વિશ્વાવસ્થા વિયન્મૂર્ત્તિર્વિદ્યુન્માલા વિહાયસી ॥ ૧૩૭॥

કિન્નરી સુરભિર્વન્દ્યા નન્દિની નન્દિવલ્લભા ।
ભારતી પરમાનન્દા પરાપરવિભેદિકા ॥ ૧૩૮॥

સર્વપ્રહરણોપેતા કામ્યા કામેશ્વરેશ્વરી ।
અચિન્ત્યાઽચિન્ત્યવિભવા હૃલ્લેખા કનકપ્રભા ॥ ૧૩૯॥

કૂષ્માણ્ડી ધનરત્નાઢ્યા સુગન્ધા ગન્ધદાયિની ।
ત્રિવિક્રમપદોદ્ભૂતા ધનુષ્પાણિઃ શિવોદયા ॥ ૧૪૦॥

સુદુર્લભા ધનાધ્યક્ષા ધન્યા પિઙ્ગલલોચના ।
શાન્તિઃ પ્રભાવતી દીપ્તિઃ પઙ્કજાયતલોચના ॥ ૧૪૧॥

આદ્યા હૃત્કમલોદ્ભૂતા ગવાં મતા રણપ્રિયા ।
સત્ક્રિયા ગિરિજા શુદ્ધા નિત્યપુષ્ટા નિરન્તરા ॥ ૧૪૨॥

દુર્ગા કાત્યાયની ચણ્ડી ચર્ચિકા શાન્તવિગ્રહા ।
હિરણ્યવર્ણા રજની જગદ્યન્ત્રપ્રવર્તિકા ॥ ૧૪૩॥

મન્દરાદ્રિનિવાસા ચ શારદા સ્વર્ણમાલિની ।
રત્નમાલા રત્નગર્ભા પૃથ્વી વિશ્વપ્રમાથિની ॥ ૧૪૪॥

પદ્માનના પદ્મનિભા નિત્યતુષ્ટાઽમૃતોદ્ભવા ।
ધુન્વતી દુઃપ્રકમ્પા ચ સૂર્યમાતા દૃષદ્વતી ॥ ૧૪૫॥

મહેન્દ્રભગિની માન્યા વરેણ્યા વરદાયિકા ।
કલ્યાણી કમલા રામા પઞ્ચભૂતા વરપ્રદા ॥ ૧૪૬॥

વાચ્યા વરેશ્વરી વન્દ્યા દુર્જયા દુરતિક્રમા ।
કાલરાત્રિર્મહાવેગા વીરભદ્રપ્રિયા હિતા ॥ ૧૪૭॥

ભદ્રકાલી જગન્માતા ભક્તાનાં ભદ્રદાયિની ।
કરાલા પિઙ્ગલાકારા નામભેદા મહામદા ॥ ૧૪૮॥

યશસ્વિની યશોદા ચ ષડધ્વપરિવર્ત્તિકા ।
શઙ્ખિની પદ્મિની સાંખ્યા સાંખ્યયોગપ્રવર્તિકા ॥ ૧૪૯॥

ચૈત્રા સંવત્સરારૂઢા જગત્સમ્પૂરણીન્દ્રજા ।
શુમ્ભારિઃ ખેચરીસ્વસ્થા કમ્બુગ્રીવાકલિપ્રિયા ॥ ૧૫૦॥

ખગધ્વજા ખગારૂઢા પરાર્યા પરમાલિની ।
ઐશ્વર્યપદ્મનિલયા વિરક્તા ગરુડાસના ॥ ૧૫૧॥

જયન્તી હૃદ્ગુહા રમ્યા ગહ્વરેષ્ઠા ગણાગ્રણીઃ ।
સંકલ્પસિદ્ધા સામ્યસ્થા સર્વવિજ્ઞાનદાયિની ॥ ૧૫૨॥

કલિકલ્મષહન્ત્રી ચ ગુહ્યોપનિષદુત્તમા ।
નિષ્ઠા દૃષ્ટિઃ સ્મૃતિર્વ્યાપ્તિઃ પુષ્ટિસ્તુષ્ટિઃ ક્રિયાવતી ॥ ૧૫૩॥

વિશ્વામરેશ્વરેશાના ભુક્તિર્મુક્તિઃ શિવાઽમૃતા ।
લોહિતા સર્પમાલા ચ ભીષણી વનમાલિની ॥ ૧૫૪॥

અનન્તશયનાઽનન્તા નરનારાયણોદ્ભવા ।
નૃસિંહી દૈત્યમથની શઙ્ખચક્રગદાધરા ॥ ૧૫૫॥

સંકર્ષણસમુત્પત્તિરમ્બિકાપાદસંશ્રયા ।
મહાજ્વાલા મહામૂર્ત્તિઃ સુમૂર્ત્તિઃ સર્વકામધુક્ ॥ ૧૫૬॥

સુપ્રભા સુસ્તના સૌરી ધર્મકામાર્થમોક્ષદા ।
ભ્રૂમધ્યનિલયા પૂર્વા પુરાણપુરુષારણિઃ ॥ ૧૫૭॥

મહાવિભૂતિદા મધ્યા સરોજનયના સમા ।
અષ્ટાદશભુજાનાદ્યા નીલોત્પલદલપ્રભા । ૧૫૮॥

સર્વશક્ત્યાસનારૂઢા ધર્માધર્માર્થવર્જિતા ।
વૈરાગ્યજ્ઞાનનિરતા નિરાલોકા નિરિન્દ્રિયા ॥ ૧૫૯॥

વિચિત્રગહનાધારા શાશ્વતસ્થાનવાસિની ।
સ્થાનેશ્વરી નિરાનન્દા ત્રિશૂલવરધારિણી ॥ ૧૬૦॥

અશેષદેવતામૂર્ત્તિર્દેવતા વરદેવતા ।
ગણામ્બિકા ગિરેઃ પુત્રી નિશુમ્ભવિનિપાતિની ॥ ૧૬૧॥

અવર્ણા વર્ણરહિતા ત્રિવર્ણા જીવસંભવા ।
અનન્તવર્ણાઽનન્યસ્થા શંકરી શાન્તમાનસા ॥ ૧૬૨॥

અગોત્રા ગોમતી ગોપ્ત્રી ગુહ્યરૂપા ગુણોત્તરા ।
ગૌર્ગીર્ગવ્યપ્રિયા ગૌણી ગણેશ્વરનમસ્કૃતા ॥ ૧૬૩॥

સત્યમાત્રા સત્યસન્ધ્યા ત્રિસન્ધ્યા સંધિવર્જિતા ।
સર્વવાદાશ્રયા સાંખ્યા સાંખ્યયોગસમુદ્ભવા ॥ ૧૬૪॥

અસંખ્યેયાઽપ્રમેયાખ્યા શૂન્યા શુદ્ધકુલોદ્ભવા ।
બિન્દુનાદસમુત્પત્તિઃ શંભુવામા શશિપ્રભા ॥ ૧૬૫॥

વિસઙ્ગા ભેદરહિતા મનોજ્ઞા મધુસૂદની ।
મહાશ્રીઃ શ્રીસમુત્પત્તિસ્તમઃપારે પ્રતિષ્ઠિતા ॥ ૧૬૬॥

ત્રિતત્ત્વમાતા ત્રિવિધા સુસૂક્ષ્મપદસંશ્રયા ।
શન્તા ભીતા મલાતીતા નિર્વિકારા નિરાશ્રયા ॥ ૧૬૭॥

શિવાખ્યા ચિત્તનિલયા શિવજ્ઞાનસ્વરૂપિણી ।
દૈત્યદાનવનિર્માત્રી કાશ્યપી કાલકર્ણિકા ॥ ૧૬૮॥

શાસ્ત્રયોનિઃ ક્રિયામૂર્તિશ્ચતુર્વર્ગપ્રદર્શિકા ।
નારાયણી નરોદ્ભૂતિઃ કૌમુદી લિઙ્ગધારિણી ॥ ૧૬૯॥

કામુકી લલિતાભાવા પરાપરવિભૂતિદા ।
પરાન્તજાતમહિમા બડવા વામલોચના ॥ ૧૭૦॥

સુભદ્રા દેવકી સીતા વેદવેદાઙ્ગપારગા ।
મનસ્વિની મન્યુમાતા મહામન્યુસમુદ્ભવા ॥ ૧૭૧॥

અમૃત્યુરમૃતાસ્વાદા પુરુહૂતા પુરુષ્ટુતા ।
અશોચ્યા ભિન્નવિષયા હિરણ્યરજતપ્રિયા ॥ ૧૭૨॥

હિરણ્યા રાજતી હૈમા હેમાભરણભૂષિતા ।
વિભ્રાજમાના દુર્જ્ઞેયા જ્યોતિષ્ટોમફલપ્રદા ॥ ૧૭૩॥

મહાનિદ્રાસમુદ્ભૂતિરનિદ્રા સત્યદેવતા ।
દીર્ઘા કકુદ્મિની હૃદ્યા શાન્તિદા શાન્તિવર્દ્ધિની ॥ ૧૭૪॥

લક્ષ્મ્યાદિશક્તિજનની શક્તિચક્રપ્રવર્તિકા ।
ત્રિશક્તિજનની જન્યા ષડૂર્મિપરિવર્જિતા ॥ ૧૭૫॥

સુધામા કર્મકરણી યુગાન્તદહનાત્મિકા ।

સંકર્ષણી જગદ્ધાત્રી કામયોનિઃ કિરીટિની ॥ ૧૭૬॥

ઐન્દ્રી ત્રૈલોક્યનમિતા વૈષ્ણવી પરમેશ્વરી ।
પ્રદ્યુમ્નદયિતા દાત્રી યુગ્મદૃષ્ટિસ્ત્રિલોચના ॥ ૧૭૭॥

મદોત્કટા હંસગતિઃ પ્રચણ્ડા ચણ્ડવિક્રમા ।
વૃષાવેશા વિયન્માતા વિન્ધ્યપર્વતવાસિની ॥ ૧૭૮॥

હિમવન્મેરુનિલયા કૈલાસગિરિવાસિની ।
ચાણૂરહન્તૃતનયા નીતિજ્ઞા કામરૂપિણી ॥ ૧૭૯॥

વેદવિદ્યાવ્રતસ્નાતા ધર્મશીલાऽનિલાશના ।
વીરભદ્રપ્રિયા વીરા મહાકામસમુદ્ભવા ॥ ૧૮૦॥

વિદ્યાધરપ્રિયા સિદ્ધા વિદ્યાધરનિરાકૃતિઃ ।
આપ્યાયની હરન્તી ચ પાવની પોષણી ખિલા ॥ ૧૮૧॥

માતૃકા મન્મથોદ્ભૂતા વારિજા વાહનપ્રિયા ।
કરીષિણી સુધાવાણી વીણાવાદનતત્પરા ॥ ૧૮૨॥

સેવિતા સેવિકા સેવ્યા સિનીવાલી ગરુત્મતી ।
અરુન્ધતી હિરણ્યાક્ષી મૃગાઙ્કા માનદાયિની ॥ ૧૮૩॥

વસુપ્રદા વસુમતી વસોર્ધારા વસુંધરા ।
ધારાધરા વરારોહા વરાવરસહસ્રદા ॥ ૧૮૪॥

શ્રીફલા શ્રીમતી શ્રીશા શ્રીનિવાસા શિવપ્રિયા ।
શ્રીધરા શ્રીકરી કલ્યા શ્રીધરાર્ધશરીરિણી ॥ ૧૮૫॥

અનન્તદૃષ્ટિરક્ષુદ્રા ધાત્રીશા ધનદપ્રિયા ।
નિહન્ત્રી દૈત્યસઙ્ઘાનાં સિંહિકા સિંહવાહના ॥ ૧૮૬॥

સુષેણા ચન્દ્રનિલયા સુકીર્તિશ્છિન્નસંશયા ।
રસજ્ઞા રસદા રામા લેલિહાનામૃતસ્રવા ॥ ૧૮૭॥

નિત્યોદિતા સ્વયંજ્યોતિરુત્સુકા મૃતજીવના ।
વજ્રદણ્ડા વજ્રજિહ્વા વૈદેહી વજ્રવિગ્રહા ॥ ૧૮૮॥

મઙ્ગલ્યા મઙ્ગલા માલા મલિના મલહારિણી ।
ગાન્ધર્વી ગારુડી ચાન્દ્રી કમ્બલાશ્વતરપ્રિયા ॥ ૧૮૯॥

સૌદામિની જનાનન્દા ભ્રુકુટીકુટિલાનના ।
કર્ણિકારકરા કક્ષ્યા કંસપ્રાણાપહારિણી ॥ ૧૯૦॥

યુગન્ધરા યુગાવર્ત્તા ત્રિસંધ્યા હર્ષવર્ધિની ।
પ્રત્યક્ષદેવતા દિવ્યા દિવ્યગન્ધા દિવાપરા ॥ ૧૯૧॥

શક્રાસનગતા શાક્રી સાન્ધ્યા ચારુશરાસના ।
ઇષ્ટા વિશિષ્ટા શિષ્ટેષ્ટા શિષ્ટાશિષ્ટપ્રપૂજિતા ॥ ૧૯૨॥

શતરૂપા શતાવર્ત્તા વિનતા સુરભિઃ સુરા ।
સુરેન્દ્રમાતા સુદ્યુમ્ના સુષુમ્ણા સૂર્યસંસ્થિતા ॥ ૧૯૩॥

સમીક્ષ્યા સત્પ્રતિષ્ઠા ચ નિવૃત્તિર્જ્ઞાનપારગા ।
ધર્મશાસ્ત્રાર્થકુશલા ધર્મજ્ઞા ધર્મવાહના ॥ ૧૯૪॥

ધર્માધર્મવિનિર્માત્રી ધાર્મિકાણાં શિવપ્રદા ।
ધર્મશક્તિર્ધર્મમયી વિધર્મા વિશ્વધર્મિણી ॥ ૧૯૫॥

ધર્માન્તરા ધર્મમેધા ધર્મપૂર્વા ધનાવહા ।
ધર્મોપદેષ્ટ્રી ધર્માત્મા ધર્મગમ્યા ધરાધરા ॥ ૧૯૬॥

કાપાલી સકલામૂર્ત્તિઃ કલા કલિતવિગ્રહા ।
સર્વશક્તિવિનિર્મુક્તા સર્વશક્ત્યાશ્રયાશ્રયા ॥ ૧૯૭॥

સર્વા સર્વેશ્વરી સૂક્ષ્મા સૂક્ષ્મા જ્ઞાનસ્વરૂપિણી ।
પ્રધાનપુરુષેશેષા મહાદેવૈકસાક્ષિણી ॥ ૧૯૮॥

સદાશિવા વિયન્મૂર્ત્તિર્વિશ્વમૂર્ત્તિરમૂર્ત્તિકા ।
એવં નામ્નાં સહસ્રેણ સ્તુત્વાઽસૌ હિમવાન્ ગિરિઃ ॥ ૧૯૯॥

ભૂયઃ પ્રણમ્ય ભીતાત્મા પ્રોવાચેદં કૃતાઞ્જલિઃ ।
યદેતદૈશ્વરં રૂપં ઘોરં તે પરમેશ્વરિ ॥ ૨૦૦॥

ભીતોઽસ્મિ સામ્પ્રતં દૃષ્ટ્વા રૂપમન્યત્ પ્રદર્શય ।
એવમુક્તાઽથ સા દેવી તેન શૈલેન પાર્વતી ॥ ૨૦૧॥

સંહૃત્ય દર્શયામાસ સ્વરૂપમપરં પુનઃ ।
નીલોત્પલદલપ્રખ્યં નીલોત્પલસુગન્ધિકમ્ ॥ ૨૦૨॥

દ્વિનેત્રં દ્વિભુજં સૌમ્યં નીલાલકવિભૂષિતમ્ ।
રક્તપાદામ્બુજતલં સુરક્તકરપલ્લવમ્ ॥ ૨૦૩॥

શ્રીમદ્વિશાલસંવૃત્તલલાટતિલકોજ્જ્વલમ્ ।
ભૂષિતં ચારુસર્વાઙ્ગં ભૂષણૈરતિકોમલમ્ ॥ ૨૦૪॥

દધાનમુરસા માલાં વિશાલાં હેમનિર્મિતામ્ ।
ઈષત્સ્મિતં સુબિમ્બોષ્ઠં નૂપુરારાવસંયુતમ્ ॥ ૨૦૫॥

પ્રસન્નવદનં દિવ્યમનન્તમહિમાસ્પદમ્ ।
તદીદૃશં સમાલોક્ય સ્વરૂપં શૈલસત્તમઃ ॥ ૨૦૬॥

નામ્નામષ્ટસહસ્રં તુ દેવ્યા યત્ સમુદીરિતમ્ ।
જ્ઞાત્વાઽર્કમણ્ડલગતાં સંભાવ્ય પરમેશ્વરીમ્ ॥ ૨૦૭॥

અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈર્ભક્તિયોગસમન્વિતઃ ।
સંસ્મરન્પરમં ભાવં દેવ્યા માહેશ્વરં પરમ્ ॥ ૨૦૮॥

અનન્યમાનસો નિત્યં જપેદામરણાદ્ દ્વિજઃ ।
સોઽન્તકાલે સ્મૃતિં લબ્ધ્વા પરં બ્રહ્માધિગચ્છતિ ॥ ૨૦૯॥

અથવા જાયતે વિપ્રો બ્રાહ્મણાનાં કુલે શુચૌ ।
પૂર્વસંસ્કારમાહાત્મ્યાદ્ બ્રહ્મવિદ્યામવાપ્નુયાત્ ॥ ૨૧૦॥

સમ્પ્રાપ્ય યોગં પરમં દિવ્યં તત્ પારમેશ્વરમ્ ।
શાન્તઃ સર્વગાતો ભૂત્વા શિવસાયુજ્યમાપ્નુયાત્ ॥ ૨૧૧॥

પ્રત્યેકં ચાથ નામાનિ જુહુયાત્ સવનત્રયમ્ ।
પૂતનાદિકૃતૈર્દોષૈર્ગ્રહદોષૈશ્ચ મુચ્યતે ॥ ૨૧૨॥

જપેદ્ વાઽહરહર્નિત્યં સંવત્સરમતન્દ્રિતઃ ।
શ્રીકામઃ પાર્વતીં દેવીં પૂજયિત્વા વિધાનતઃ ॥ ૨૧૩॥

સમ્પૂજ્ય પાર્શ્વતઃ શંભું ત્રિનેત્રં ભક્તિસંયુતઃ ।
લભતે મહતીં લક્ષ્મીં મહાદેવપ્રસાદતઃ ॥ ૨૧૪॥

તસ્માત્ સર્વપ્રયત્નેન જપ્તવ્યં હિ દ્વિજાતિભિઃ ।
સર્વપાપાપનોદાર્થં દેવ્યા નામ સહસ્રકમ્ ॥ ૨૧૫॥

॥ ઇતિ શ્રીકૂર્મપુરાણે ષટ્સાહસ્ર્યાં સંહિતાયાં
પૂર્વવિભાગે શ્રીદેવીસહસ્રનામસ્તોત્રમ્ ॥

From sa.wikisource.org Kurmapurana.
Proofread byDPD from shrIshaktisahasranAmastotra sa.ngraha
Book number 3472 with vyAkhyA available at
Chaukhamba Sanskrit Pustakalay, Varanasi
(It was condensed from Kurmapurana removing Himavana stuti.)

---

*Shri Devi SahasranAmastotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*